# संस्कृतवाङ्मये धातुपाठपरम्परा एवं पाणिनीय-धातुवृत्तयः

डॉ. देवानन्द शुक्लः*

dev.shukl@gmail.com

**सारः**

*संस्कृतवाङ्मयपरम्परायां व्याकरणशास्त्रपरम्परापि अतीव प्राचीना वर्तते। वैदिकवाङ्मयमिव व्याकरणमपि अतीव पुरातनं विद्यते। वैदिकसाहित्ये ब्राह्मणसंहितारण्यकोपनिषत्सु अपि व्याकरणप्रतिपाद्यविषयाः क्वचित् क्वचित् दृश्यन्ते। विस्तरेण व्याकरणविषयाः तत्सम्बद्धविषयाश्च शिक्षाग्रन्थेषु प्रातिशाख्येषु निरुक्तेषु व्याकरणेषु च समुपबृंहिताः सन्ति। पाणिनेः पूर्ववर्तिनः नैके वैयाकरणाः पाणिनेः प्राक् विविधं व्याकरणं तेनुः। पाणिनिः स्वयमेव दशानां पूर्ववर्तिनां वैयाकरणानां नामानि उल्लिलेख। एते दश वैयाकरणाः आपिशलिः[१] काश्यपः[२] गार्ग्यः[३] गालवः[४] चाक्रवर्मणः[५] भारद्वाजः[६] शाकटायनः[७] शाकल्यः[८] सेनकः[९] स्फोटायनश्च[१०] सन्ति। तदतिरिच्य पाणिनिपूर्ववर्तिनां षोडशानाम् अन्येषाम् अपि वैयाकरणानां नामानि अन्यत्र लभ्यन्ते। एते षोडश वैयाकरणाः शिवः महेश्वरः वा बृहस्पतिः इन्द्रः वायुः भरद्वाजः भागुरिः पौस्करसादिः चारायणः काशकृत्स्नः सनातनः व्याघ्रपादः माध्यन्दिनिः रौढिः शौनकः गौतमः व्याडिश्च वर्तन्ते।[११]*

**Keywords**: शाब्दिकाभरणम्, हरियोगी, धातुपाठः, काशकृत्स्न-व्याकरणम्

* कार्यक्रम अधिकारी, महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान, उज्जैन.

१ वा सुप्यापिशलेः (पा० अ० ६.१.९२)

२ तृषिमृषिकृषेः काश्यपस्य (पा० अ० १.२.२५)

३ ओतो गार्ग्यस्य (पा० अ० ८.३.२०)

४ अड्गार्ग्यगालवयोः (पा० अ० ७.३.९९)

५ ई३ चाक्रवर्मणस्य (पा० अ० ६.१.१३०)

६ ऋतो भारद्वाजस्य (पा० अ० ७.२.६३)

७ त्रिप्रभृतिषु शाकटायनस्य (पा० अ० ८.४.५०)

८ लोपः शाकल्यस्य (पा० अ० ८.३.१९)

९ गिरेश्च सेनकस्य (पा० अ० ५.४.११२)

१० अवङ् स्फोटायनस्य (पा० अ० ६.१.१२३)

११ व्याकरण शास्त्र का इतिहास- युधिष्ठिर मीमांसक

## 1. धातुपाठाः तेषां प्रवक्तारश्च (संक्षिप्तः उल्लेखः)

व्याकरणशास्त्रे पञ्चानामङ्गानां परम्परा दृश्यते। अत एव पञ्चाङ्गं व्याकरणम् इत्यपि प्रथितम्। पञ्च अङ्गानि इमानि सन्ति - सूत्रपाठः धातुपाठः गणपाठः उणादिपाठः लिङ्गानुशासनञ्चेति।

एतेषु पञ्चसु अङ्गेषु धातुपाठः अतिमहत्वपूर्णं स्थानं भजते। प्रायेण संस्कृतशब्दाः व्युत्पन्नाः इति प्रसिद्धा परम्परा । प्रायेण सर्वेषां शब्दानां व्युत्पत्तिः धातुभिः एव प्रदर्श्यते। उच्यते च - सर्वं च नाम धातुजमाह । अत एव संस्कृतव्याकरणे धातूनां महत्त्वं सर्वथा अतिशेते।

बहवः वैयाकरणाः धातूनां प्रवचनम् अकार्षुः। श्रीमता युधिष्ठिरमीमांसकेन व्याकरणशास्त्रेतिहासग्रन्थे षड्विंशतेः वैयाकरणानाम् उल्लेखः कृतः। तेषां व्याकरणानि सम्प्रति नोपलभ्यन्ते अतः तेषु केन केन धातुप्रवचनं कृतमिति निश्चप्रचं वक्तुमशक्यम्। किञ्च प्रकृतिप्रत्ययविभाग-कल्पनां विना व्याकरणप्रवृत्तिः न सम्भवति इति धिया प्रायेण तैः सर्वैरपि धातुप्रवचनं कृतं स्यादिति ऊहितुं शक्यते। युधिष्ठिरमीमांसकवर्यैः पाणिनिपूर्ववर्तिनां धातुपाठप्रवक्तॄणां येषां धातुपाठविषये काचित् सूचना कुतश्चित् लब्धा तेषां संक्षेपेण विवरणं प्रादायि। एतेषु इन्द्रः वायुः भागुरिः काशकृत्स्नः शाकटायनः आपिशलिः इत्येते प्रमुखाः विद्यन्ते।

संस्कृतवाङ्मये पाणिनेः शब्दानुशासनं पञ्चभिः अवयवैः परिपूर्णं समुपलभ्यते। पाणिनीयव्याकरणसम्प्रदाये यः धातुपाठः पठनपाठनयोः समुपयुज्यते सः पाणिनिप्रोक्तः इति बहुभिः वैयाकरणैः मन्यते। यद्यपि न्यासकारः जिनेन्द्रबुद्धिः पाणिनीयसम्प्रदाये प्रचलितधातुपाठस्य पाणिनि-प्रोक्तत्वं नैव स्वीकरोति। किञ्च व्याकरणशास्त्रेतिहासकाराः अन्ये च विद्वांसः जिनेन्द्रबुद्धेः मतमेतन्नाद्रियन्ते । सम्प्रति पाणिनीयधातुपाठनाम्ना प्रसिद्धः धातुपाठः पाणिनिना प्रोक्तः इत्येव सिद्धान्तः मन्यते।

पाणिनीयधातुपाठः सूत्रपद्धत्या विरचितः। यथा पाणिनीयशब्दानुशासने विधिनिषेधादिप्रकाराणां सूत्रानुसारः निर्देशः वर्तते तथैव पाणिनीयधातुपाठेऽपि वर्तते। यथा-

| | |
|---|---|
| भू सत्तायाम् | अयं विधिः। |
| न कम्यमिचमाम् | अयं निषेधः। |
| राधोऽकर्मकाद्वृद्धावेव | अयं नियमः । |
| स्वादयः ओदितः | अयमतिदेशः। |
| घटादयो मितः | इयं संज्ञा। |
| अदन्ताः | अयमधिकारः। |

सूत्रेषु अनुवृत्त्यनुकर्षणाय चकारः प्रयुक्तः। विकल्पविधानार्थं वा शब्दः प्रयुक्तः यथा आधृषाद्वा।

धात्वर्थनिर्देशकसूत्राणां वर्गत्रयं दृश्यते- प्रथमवर्गे एकस्य अनेकेषां वा धातूनां विभक्तिं विना पाठः कृतः। अर्थनिर्देशस्तु सप्तम्यन्तपदेन कृतः। केचन धातवः सूत्रेषु सविभक्तिकाः निर्दिष्टाः यथा राधोऽकर्मकाद्वृद्धावेव भुवोऽकल्कने, कृपेस्तादर्थ्ये। केषुचित् सूत्रेषु पूर्वमर्थं विचार्य पश्चात् सविभक्तिकधातुप्रयोगः कृतः यथा मारणतोषणनिशामनेषु ज्ञा कम्पने चलिः जिह्वोन्मथने लडिः। केषुचित् सूत्रेषु पदक्रमः वर्तते तथाहि पूर्वमुपसर्गप्रयोगः पश्चाद्धातुप्रयोगः पश्चादर्थनिर्देशश्च यथा-आङः शासु इच्छायाम्। केचन धातवः नेकेषु गणेषु

पठिताः। तत्र इमे हेतवः स्युः। प्रथमः हेतुः धातुः समानार्थकः किञ्च रूपे भेदः यथा पुष पुष्टौ धातुः तत्र भ्वादौ पोषति इति रूपम्। दिवादौ पुष्यति इति क्र्यादौ पुष्णाति इति रूपं भवति। अत्र रूपभेदः वर्तते परञ्च एक एवार्थः। द्वितीयः हेतुः अर्थभेदः रूपभेदश्च । यथा विदधातुः अदादिगणीयः विदधातोः वेत्ति इति रूपम्। तत्र ज्ञानार्थे विदधातुः प्रयुक्तः। तथैव दिवादौ विदधातोः विद्यते इति रूपम्। तत्र सत्तार्थकः विदधातुः रुधादौ विन्ते इति रूपम् तत्र विचारणार्थः विदधातुः। तृतीयो हेतुः स्वरभेदः यथा षद्लृधातुः तस्य भ्वादौ सीदति इति रूपम् तत्राद्युदात्तस्वरः तुदादौ मध्योदात्तस्वरः। इतोऽपि नैकविशिष्ट्यप्रयुक्तः पाणिनीयधातुपाठः दिङ्मात्रमेवात्र उद्धृतः।

काशकृत्स्नधातुपाठः सर्वेभ्यः धातुपाठेभ्यः विशालकायः अस्ति। धातुपाठेऽस्मिन् अनुबन्धनामुपसर्गाणामपि धातुत्वेन प्रयोगो वर्त्तते यथा अति उपसर्गस्य धातुत्वेन क्रमणहिंसयोः अर्थयोः प्रयोगः लभ्यते।

चान्द्रधातुपाठस्य प्रवक्ता चन्द्रगोमी वर्तते। एषः बङ्गदेशीय इति प्रतिपादितं व्याकरणशास्त्रेतिहासकारैः। चन्द्रगोमी देवनन्दिनः परवर्ती । देवनन्दिनः कालः पञ्चमशताब्द्यां मन्यते । अतः चन्द्रगोमिनः कालः पञ्चमशताब्द्याः पूर्ववर्ती स्यात् । वाक्यपदीयस्य द्वितीयकाण्डे चन्द्रगोमिना महाभाष्यस्य प्रचारः कृतः इति प्राप्यते अतः चन्द्रगोमी पतञ्जलेः परवर्ती एवास्ति । पतञ्जलेः कालः १४५ ई०पू० अङ्गीक्रियते । भर्तृहरेः कालः ५०० ई० अस्ति अतः चन्द्रगोमिनः कालोऽपि २५०-३५० ई- मध्ये स्यात्।

धातुपाठोऽयं पाणिनीयधातुपाठापेक्षया लघुः। अत्र १५७५ धातवः सन्ति। चान्द्रधातुपाठे प्रायः समानार्थकाः धातवः सन्ति। सप्तदशषु स्थलेषु अनेकार्थवाचकाः धातवः सन्ति। चान्द्रधातुपाठे अतङाना इत्यनेन पाणिनिप्रयुक्तपरस्मैपदस्य बोधः जायते। तङानिन् इत्यनेन आत्मनेपदबोधो भवति। विभाषिताः इति शब्देनोभयपदस्य बोधो भवति। क्रमदृष्ट्याऽपि पाणिनीयधातुपाठे चान्द्रधातुपाठे चास्ति पार्थक्यम्। धातुपाठेऽस्मिन् भाषार्थकधातुवर्गः लुप्तः। एतदतिरिक्तम् आकुस्मीय आधृषीय इत्यादीनां कथाद्यन्तर्गणानामपि पाठो न विद्यते। चान्द्रधातुपाठे पाणिनिप्रयुक्तस्य ञि इत्यनुबन्धप्रयोगो न दृश्यते।

जैनेन्द्रधातुपाठः देवनन्दिना प्रोक्तः। देवनन्दिना स्वकीयग्रन्थे स्वकालविषये गुरुपरम्पराविषये च न किमपि लिखितम्। व्याकरणशास्त्रेतिहासकारैः एतस्य कालः ४१३-४५३ ईश्वीये निर्णीतः।

एषः धातुपाठः चान्द्रधातुपाठादपि लघुः। पाणिनिप्रयुक्तानां परस्मैपद-आत्मनेपद-उभयपदसंज्ञानां स्थाने जैनेन्द्रधातुपाठे भवन्ता, एदित्, जित् इति संज्ञाः प्रयुक्ताः। भू धातोः पश्चादात्मनेपदि-परस्मैपदि-उभयपदिधातूनां यथाक्रमं पाठाः वर्तन्ते । अत्र जुहोत्यादिगणः अदादिगणात् प्राग्वर्तते। ऐ औ इत्यनुबन्धद्वयस्य प्रयोगः अन्येभ्यः अस्य धातुपाठेभ्यः वैशिष्ट्यं विद्यते। ऐ अनुबन्धः आत्मनेपदीयधातूनां कृते अस्ति। औ अनुबन्धः अनिट्धातूनां द्योतकः वर्तते । छान्दस-धातूनां प्रयोगः जैनेन्द्रधातुपाठे न विद्यते। जैनेन्द्रधातुपाठे केचन सन्ति एतादृशाः धातवः येषामर्थः पाणिनिनिर्दिष्टधात्वर्थाद्भिन्नः। यथा- क्षुभ सञ्चलने इति पाणिनिधातुपाठे। जैनेन्द्र धातुपाठे क्षुभ संक्षोभे इति पठ्यते। सार कृप श्रथ दौर्बल्ये इति पाणिनीयधातुपाठे लभ्यते जैनेन्द्रधातुपाठे शैथिल्येऽर्थे एते धातवः पठिताः।

कातन्त्रधातुपाठः दुर्गसिंहेन प्रोक्तः। क्षीरस्वामिपुरुषकाराभ्यां स्वकीयग्रन्थेषु कातन्त्रधातुपाठस्योल्लेखः दुर्गः अथवा दौर्गः इति नाम्ना कृतः। कातन्त्रधातुपाठः काशकृत्स्नधातुपाठस्य संक्षेप एव। एषोऽपि जैनेन्द्रात् परवर्ती।

काशकृत्स्नधातुपाठ इव कातन्त्रधातुपाठेऽपि नव गणाः वर्तन्ते। जुहोत्यादिगणः अदादिगणान्तर्गतः। धातुपाठक्रमोऽपि काशकृत्स्नधातुपाठ-वद्वर्तते । घटादिसूत्राणां शब्दानुपूर्व्यामपि काशकृत्स्नकातन्त्रधातुपाठयोः अस्ति साम्यम् यथा-

काशकृत्स्नधातुपाठे-

ज्वलह्वलह्मलनमोऽनुपसर्गाद्वा।

कातन्त्रधातुपाठे -

ज्वलह्वलह्मलनमामप्रमादीनां वा।

काशकृत्स्नकातन्त्रधातुपाठयोः -

ग्लास्नावनुवमश्वनकम्यमिचमः

शाकटायनधातुपाठः पाणिनेः परवर्तिना पाल्यकीर्तिशाकटायनेन प्रोक्तः। पाल्यकीर्तिः यापनीयसम्प्रदायदीक्षितः। यापनीयसम्प्रदाये दिगम्बर-श्वेताम्बरयोः मध्यवर्तिसम्प्रदायः आसीत्। पाल्यकीर्ति-शाकटायनस्य समयविषये नास्ति मतभेदः। एतस्य कालः नवमशताब्द्यामस्ति निर्णीतः।

शाकटायन-धातुपाठः दशसु गणेषु विभक्तः। शाकटायनधातुपाठः जैनेन्द्रधातुपाठस्यैव संवर्धितरूपः। प्रथमे दशमे गणे पठिताः धातवः जैनेन्द्र-धातुपाठ इव वर्तन्ते। छान्दस-धातूनां प्रयोगः जैनेन्द्रधातुपाठवत् अत्रापि नास्ति। धातुपाठेऽस्मिन् अन्येभ्यः धातुपाठेभ्यः किञ्चिद्वैशिष्ट्यं दृश्यते। एषः धातुपाठः भूधातोः न आरभते। अस्मिन् धातुपाठे भूधातुः परस्मैपदिषु धातुषु अन्तः निविष्टः। एष एव धातुपाठः तादृशः लभ्यते यस्य आरम्भः भूधातोः नास्ति।

हैमधातुपाठः हेमचन्द्रसूरिणा प्रोक्तः । एतस्य जन्म गुर्जरप्रान्तस्य अहमदाबादनगरस्य धुन्धकग्रामे कार्तिक-पूर्णिमायां संवत् ११४५ मध्येऽभूत्। मृत्युः १२२९ खीष्ट्राब्दे अभूत्। हेमचन्द्रसूरिणः पितुः नाम चाचिग एवं मातुर्नाम पाहिणी आसीत्। हेमचन्द्रसूरिः मौढ्यवंशीयवैश्यकुले बभूव।

हैमधातुपाठे अकारादिक्रमेण धातुनिरूपणं वर्तते। अन्तर्गणीयधातूनामपि अकारादिक्रमेण काशकृत्स्न-कातन्त्रधातुपाठवत् हैमधातुपाठेऽपि जुहोत्यादिगणस्य अदादिगणेऽन्तर्भावः दृश्यते। क्षवर्णः अत्र स्वतन्त्रवर्णत्वेन परिगणितः अतः हकारान्तधातूत्तरं क्षकारान्तधातूनां पाठः विद्यते। तस्य गणस्य धातुः तदनुबन्धेन युक्तो भवति एतेन कस्य धातोः कस्मिन् गणे पाठ इति ज्ञानं सारल्येन भवति । हैम धातुपाठे अनिट् धातुज्ञापनाय अनुस्वारस्य प्रयोगः विद्यते।

कविकल्पद्रुमधातुपाठः वोपदेवेन प्रोक्तः। एतस्य पितुः नाम केशवः। केशवः देवगिर्याः यादववंशीयः सिद्यणस्य सभापण्डितः आसीत्। यादवनरेश-महादेव-रामचन्द्रयोः धर्माध्यक्षः हेमाद्रेः आश्रये वोपदेवेन नानाशस्त्रसंबन्धिग्रन्थाः निर्मिताः। वोपदेवस्य कालः त्रयोदशशताब्द्याः उत्तरार्द्धे स्थिरीभवति।

पद्यात्मकोऽयं धातुपाठः अनुष्टुप्-छन्दसि विद्यते। धातोः अन्तिमं वर्णमाश्रित्य पद्यं निर्मितम्। प्रथमपद्ये आदित्यनमस्कारः तदनु तेषाम् आचार्याणामुल्लेखः कृतः येषां धातुपाठाः वर्तन्ते। अनुबन्धस्थानं तत्प्रयोजनम् अनिट्धातुबोधनाय औकारानुबन्धस्योल्लेखः अस्य वैशिष्ट्यम्। काशकृत्स्नधातु-पाठानन्तरं कविकल्पद्रुमधातुपाठः एवास्ति यत्र सर्वाधिकसंख्याकाः धातवः सन्ति। कविकल्पद्रुमधातुपाठः क्षीरतरङ्गिण्याः हैमधातुपाठात् प्रभावितोऽस्ति। हैमधातुपाठे पठितानां धातूनामपि तत्रोल्लेखः वर्तते यथा रवु रिबु कूणिण् पसुन्। कविकल्पद्रुमधातुपाठे ४३ अनुबन्धाः सन्ति तत्र सप्तदशानुबन्धाः आचार्यपाणिनेरेव। औकारानुबन्धः जैनेन्द्रधातुपाठाद्गृहीतः तदतिरिक्ताः स्वोपज्ञाः वर्तन्ते।

## 2. पाणिनीयधातुपाठस्य वृत्तयः

आचार्यपाणिनेः धातुप्रवचनकालादारभ्य अद्यावधि अनैकैः आचार्यैः पाणिनीयं धातुपाठम् आश्रित्य वृत्तयः कृताः। किन्तु तासु काश्चन एव इदानीमुपलभ्यन्ते। अनेकासां नामान्यपि अज्ञातानि। अत्र परिज्ञाताः वृत्तिकाराः वृत्तयश्च उद्ध्रियन्ते-

पाणिनिः स्वयमपि पाणिनीयधातुपाठस्य व्याख्याता वर्तते। सः अष्टाध्यायीसूत्राणां कामपि वृत्तिम् अवश्यमेव विनिर्दिष्टवान्। वृत्तिं विना सूत्रग्रन्थस्य प्रवचनं सर्वथा अशक्यम्। इमां परम्परां मनसि निधाय आचार्यसायणः अलिखत्-

अस्माकं तूभयमपि प्रमाणम् उभयथा शिष्याणां प्रतिपादनात्।

क्षीरस्वामिनापि लिख्यते।

वक्ष्यति च--

पाठमध्येऽनुदात्तनामुदात्तः कथितः क्वचित्।

अनुदात्तेऽप्युदात्तानां पूर्वेषामनुरोधतः।

अत्र वक्ष्यति क्रियायाः कर्ता कः, एतत् क्षीरस्वामिना न स्पष्टीकृतम्। क्षीरस्वामिनः वाक्यविन्यासप्रकारेण अनुमीयते यत् क्षीरस्वामिनः दृष्टौ वक्ष्यति क्रियायाः कर्ता भगवान् पाणिनिरेव। अनेन ज्ञायते यत् पाणिनिः एव धातुपाठस्य प्रवचनम् अकरोत् तस्यार्थावबोधनाय वृत्तिमपि अलिखत्।

आचार्यसुनागः पाणिनीयधातुपाठस्य व्याख्यानम् अकार्षीत् इति कतिपयप्रमाणैः ज्ञायते। यथा काशिकायां 'विभाषा भावादिकर्मणोः' इति सूत्रव्याख्यायाम् आचार्यवामनेन लिख्यते-

सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन अस्यतेर्भावे।

एतदेव सौनागमतम् आचार्यसायणेन अनेकेषु स्थलेषु निर्दिष्टम्। क्षीरतरङ्गिण्याम् आदौ अन्ते च धात्वर्थसम्बद्धसौनागमतमुद्धृतमस्ति।

भीमसेनः पाणिनीयधातुपाठोपरि कश्चिद्वृत्तिग्रन्थं व्यरचयत्। पक्षेऽस्मिन् अनेकानि प्रमाणानि सन्ति -

यथा- अत्र आचार्यहेमचन्द्रः हैमशब्दानुशासनस्य बृहद्वृत्तौ लिखति|

अन्ये त्वद्दिट पठन्ति।

अस्य स्वोपज्ञबृहन्न्यास-इत्याख्यायां व्याख्यायां आचार्य-हेमचन्द्रेणोद्धृतम्

अन्ये त्विति भीमसेनादयः।

कविकल्पद्रुमटीकायां दुर्गादासः लिखति-

स्तम्भ इह क्रियानिरोधः इति भीमसेनः।

दैवग्रन्थव्याख्याता कृष्णलीलाशुकमुनिः उद्धरति

क्षप प्रेरणे भीमसेनेन कथादिष्वपठितोऽप्ययं बहुलमेतन्निदर्शनम् इत्युदाहरणत्वेन धातुवृत्तौ पठ्यते।

उपर्युक्तपाठे 'धातुवृत्तौ पठ्यते' इत्यस्य कर्ता भीमसेनातिरिक्तः अन्यः न भवितुमर्हति । अनेन स्पष्टीभवति यत् भीमसेनः कश्चन धातुवृत्तिव्याख्यान-ग्रन्थमलिखत्।

पारायणनामकः कश्चन ग्रन्थः धातुपाठमाश्रित्य लिखितः आसीदिति विविधेषु ग्रन्थेषु उद्धरणेन ज्ञायते। तथाहि काशिकायाः आरम्भे-

'नामधातुपारायणादिषु' इति लभ्यते

ज्ञापकसमुच्चये -

ततः अभ्र बभ्रेति ------बाबभ्र्यते भवतीति पारायणिकाः।

पुरुषकारे-

अनिदित् पारायणेष्वपाठि, गोजति जुगोज।

नन्दिस्वामिनाऽपि धातुपाठमाश्रित्य एका व्याख्या अकारि। क्षीरस्वामिना क्षीरतरङ्गिण्यां नैकेषु स्थलेषु नन्दिधातुपाठः उद्धृतः। क्षीरतरङ्गिण्यां 'नन्दीस्वामिनौ' इति पाठः समुपलभ्यते। अस्य पाठान्तरं 'नन्दीस्वामी' अपि वर्तते। दैवव्याख्यानपुरुषकारे सुधाकरस्य उद्धृतः यः पाठः यत्र 'नन्दीस्वामी' इति निर्देशः विद्यते।

राजश्रीधातुवृत्तेः एकः पाठः सर्वानन्देनाऽपि अमरटीकासर्वस्वे उद्धृतः 'दीर्घत्वे सूक्षणमिति राजश्रीधातुवृत्तिः' संभाव्यते यत् राजश्रीधातुवृत्तेः लेखकः राजश्री एव।

नाथीयधातुवृत्तिः अपि पाणिनीयधातुपाठमाश्रित्य काचन वृत्तिः आसीत्। नाथीयधातुवृत्तेः विवरणं सर्वानन्दकृते अमरटीकासर्वस्वे प्राप्यते -

'नाथीयधातुवृत्तावपिकोषवन्मूर्धन्यषत्वं तालव्यत्वं चोक्तम्।'

नाथीयधातुवृत्तेः लेखकस्य नाम अज्ञातः। पदैकदेशन्यायेन रमानाथविरचितधातुवृत्तिः 'नाथीय' इति नाम्ना व्यवहर्तुं शक्यते परन्तु रमानाथस्य कालः वि०सं० १५९३ अस्ति। अतः अस्याः धातुवृत्तेः सम्बन्धः रमानाथेन सह भवितुं नार्हति। कश्चन अन्यः एव अस्याः वृत्तेः कर्ता स्यात्।

कौशिकः इति नाम्ना कस्यचित् धातुवृत्तिकारस्य मतानि क्षीरस्वामिना क्षीरतरङ्गिण्याम् अनेकेषु स्थलेषु उद्धृतानि। उद्धरणैः प्रतीयते यत् कौशिकस्य वृत्तिः पाणिनीयधातुपाठोपरि एव लिखिता भवेत्।

क्षीरस्वामी पाणिनीयधातुपाठस्य औदीच्यपाठोपरि क्षीरतरङ्गिणी नामकम् एकं वृत्तिग्रन्थम् अलिखत्। अनेन महाभागेन क्षीरतरङ्गिण्याम् अमरकोशोद्घाटने च स्वस्य विषये किमपि न वर्णितम्। क्षीरस्वामी स्वजन्मना भारतस्य कं प्रान्तं, नगरं ग्रामं वा अलञ्चकार, अस्मिन् विषयेऽपि किमपि न समुपलभ्यते।

क्षीरतरङ्गिण्याः अमरकोशस्य च आरम्भे वाग्देव्याः श्लाघावर्णनेन क्षीरतरङ्गिण्याः अन्ते दृश्यमानेन श्लोकेन च प्रतीयते यत् सः कश्मीरवासी स्यात्। यद्यपि क्षीरस्वामिनः कालविषये निश्चयेन किमपि वक्तुं न शक्यते तथापि विद्वद्भिः विषयेऽस्मिन् विचारणा कृता। केषाञ्चित् मते अस्य कालः संवत् ११०० इति भवेत्। केचिदन्ये आहुः यत् क्षीरस्वामी १११० विक्रमी संवततः पूर्ववर्ती इति।

मैत्रेयरक्षितनाम्ना बौद्धविदुषा धातुपाठोपरि धातुप्रदीपनाम्नी एका लघुवृत्तिः विरचिता । एतेषां जन्मस्थानकुलदेशकालादिविषये किञ्चित् प्रामाणिकरूपेण न प्राप्यते। अनुमीयते यत् एषः बङ्गदेशनिवासी आसीत् इति अस्य ग्रन्थलेखनकालः ११४०-११६५ ई० स्यादिति।

हरियोगिना विरचिता धातुपाठस्य वृत्तिः शाब्दिकाभरणम् इति नाम्ना प्रसिद्धा। हरियोगी पुरुषकार-लीलाशुकमुनेः प्राग्वर्ती विक्रमस्य 12 शतके आसीदिति व्याकरणशास्त्रेतिहासग्रन्थे प्रतिपादितम्। एतस्य पितुः नाम प्रोल्लनाचार्यः आसीत्।

देवनामकः कश्चन विद्वान् पाणिनीयधातुपाठविषये 'दैव' इति नाम्ना एकं श्लोकात्मकं ग्रन्थं व्यरचयत्। एतेषां देशकालविषयेऽपि अधिकं प्रामाणिकं नोपलभ्यते। दैवग्रन्थस्य सम्पादकेन गणपतिशास्त्रिणा एतेषां कालः ख्रीस्ताब्दनवमशताब्द्याः आरभ्य द्वादशशताब्द्याः मध्ये स्यादिति स्वीकृतः। देवः मैत्रेयरक्षितादुत्तरवर्ती। अतः एतेषां कालः ११५० तः १२०० मध्ये स्यात्।

काश्यपेन कापि धातुवृत्तिः रचिता। माधवीया धातुवृत्तौ काश्यपनामवैयाकरणस्य धातुवृत्तिविषयकमतानि उद्धृतानि। अस्य आचार्यस्य कालविषये इदमित्थं किमपि वक्तुं न शक्यते।

आत्रेयेण अपि धातुपाठोपरि कश्चिद्वृत्तिग्रन्थः लिखितः आसीत्। सायणाचार्येण माधवीयाधातुवृत्तौ आत्रेयस्य मतानि बहुधा उद्धृतानि। अस्य साक्षादुल्लेखः सायणेन अथर्वभाष्ये (२/२०/५) कृतः। पाणिनीयधातुपाठस्य व्याख्यात्रा मैत्रेयेण सह आत्रेयस्योल्लेखेन ज्ञायते यत् आत्रेयेण पाणिनीयधातुपाठविषये एका वृत्तिः लिखिता। सायणेन आत्रेयः उद्धृतः। सायणस्य कालः १४०० वि०सं० अस्ति। अतः आत्रेयः १४०० वि०सं० पूर्ववर्ती स्यात्।

हेलाराजेन अपि पाणिनीयधातुपाठविषये विरचिता काऽपि वृत्तिः आसीत्। वृत्तिकारस्य अस्य उल्लेखः माधवीया धातुवृत्तौ लभ्यते -

अत्र स्वामी संहितायां धातुपाठात् 'वा' शब्दमुत्तरधातुशेषं वष्टि। तन्निपातस्य वा शब्दस्य 'च' शब्दादिवत् पूर्वप्रयोगो नेति हेलाराजीयादौ समर्थनादयुक्तम्।

उद्धरणेऽस्मिन् स्मृतः हेलाराजः वाक्यपदीयटीकाकारो तद्भिन्नो वा भवितुमर्हति। यदि अयं वाक्यपदीयटीकाकारः स्यात्तदा अस्य समयः एकादशशताब्द्याः उत्तरार्द्धभागः भवेत्।

आचार्यसायणः संस्कृतवाङ्मये अत्यन्तं प्रसिद्धः। सायणेन ज्येष्ठभ्रातुः माधवस्य नाम्ना पाणिनीयधातुपाठे रचिता धातुवृत्तिः। व्याकरणवाङ्मये एषा माधवीया धातुवृत्तिः, धातुवृत्तिः वा इति नाम्नाऽभिधीयते। सायणेन स्वविरचितग्रन्थेष्वात्मपरिचयः प्रदत्तः। अस्य पितुर्नाम मायणः मातुः नाम श्रीमती आसीत्। अस्य ज्येष्ठभ्राता माधवः कनिष्ठश्च भ्राता भोगनाथः आसीत्। सायणः भारद्वाजगोत्रीयः तैत्तिरीयसंहितेयः बौधायनसूत्रीयश्च आसीत्। अस्य जन्म वि०सं० १३७२ तमे वर्षे अभूत् शरीरत्यागश्च वि०सं० १४४४ तमे वर्षेऽभूत्। सायणः एकत्रिंशे आयुषि विजयनगरस्य महाराजहरिहरप्रथमस्य अनुजकम्पणस्य मन्त्रिपदमलङ्करोत्। ततः

कम्पणपुत्रसंगमस्य शिक्षकपदं मन्त्रिपदञ्च अलञ्चकार। तदनन्तरं बुक्कप्रथमस्य हरिहरद्वितीयस्य च आमात्यपदं सुशोभितवान्। धातुवृत्तेः आद्यन्तपाठं दृष्ट्वा ज्ञायते यत् सायणेन राज्ञः संगमस्य राज्यकाले धातुवृत्तिः विरचिता। अनेन सम्भाव्यते यत् धातुवृत्तिः वि०सं० १४१२-१४२० मध्ये लिखिता आसीत्।

## 3. पाणिनीयधातुपाठस्य व्याख्यानं शाब्दिकाभरणम्

पूर्वोक्तविवरणेन स्फुटं यत् पाणिनीयं धातुपाठमाश्रित्य नैकाः वृत्तयः विरचिताः। तासु अनेकाः वृत्तयः लुप्ताः नैकाः प्रकाशिताश्च। काश्चन अप्रकाशिताश्चापि सन्ति। लुप्तानां नाममात्रेणैवोल्लेखः उपलभ्यते। यथा सुनाग-भीमसेन-प्रभृतीनाम् आचार्याणां वृत्तयः काशिका-माधवीय-धातुवृत्ति-क्षीरतरङ्गिणी-क्रियारत्नसमुच्चयामरटीकासर्वस्वप्रभृतिषु ग्रन्थेषु उल्लिखिताः, परञ्च अद्यत्वे नैवोपलभ्यन्ते।

सम्प्रति प्रकाशितासु धातुवृत्तिषु क्षीरतरङ्गिणी-धातुप्रदीप-दैव-पुरुषकार- माधवीयधातुवृत्तिप्रभृतयः मुख्याः। एताः वृत्तीः अतिरिच्य पाणिनीयधातु-पाठस्योपरि अतीव महत्त्वपूर्णा हरियोगिना विरचिता चैका वृत्तिः शाब्दिकाभरणनाम्नी प्राप्यते। एषा धातुवृत्तिः प्रकाशितेभ्यः दैव-पुरुषकार-माधवीयाधतुवृत्ति-प्रभृतिग्रन्थेभ्यः प्राचीना। अस्याः वृत्तेरुल्लेखः पुरुषकार-माधवीयाधातुवृत्त्यादिग्रन्थेषु बहुत्र वर्तते तद्यथा

पुरुषकारे शाब्दिकाभरणकर्तुः हरियोगिनः उल्लेखः

१. श्रातेरनुकरणमिति हरियोगी।[१]

२. हरियोगी तु अत्र 'संज्ञापूर्वो विधिरनित्यः इत्येतदाश्रित्य क्षेणोतीत्युदाहर्षीत्।[२]

३. धनपाल-हरियोगि-पूर्णचान्द्रास्तु दरतीत्येवाहुः।[३]

४. रुट लुट इति हरियोगी।[४]

माधवीयाधातुवृत्तौ शाब्दिकाभरणस्य हरियोगिनश्चोल्लेखः

१. शाब्दिकाभरणे तु गुण एवोदाहृतः।[५]

२. रुट लुट लुठ प्रतीघाते-------हरियोगिनस्तु आद्यावेव।[६]

सिद्धान्तकौमुद्याम् आभरणकारस्योल्लेखः

१. णिसि चुम्बने। आभरणकारस्तु इति तालव्यान्तः इति बभ्राम।[७]

---

१ दैवपुरुषकारे पृ० २१

२ दैवपुरुषकारे पृ० २१

३ दैवपुरुषकारे पृ० ३७

४ दैवपुरुषकारे पृ- ५८

५ माधवीया धातुवृत्तौ पृ० ५०८

६ माधवीया धातुवृत्तौ पृ० १८६

७ सिद्धान्तकौमुदी १०२५ णिसि चुम्बने इति धातोः उपरि

शब्दकौस्तुभे आभरणकारस्योल्लेखः

१. अत्राभरणकारः - गुपादिसूत्रे गुप्तिज्किन्मानित्युपक्रम्य गुपादिष्वनुबन्धकरणमात्मनेपदार्थमिति भाष्ये वार्तिके चोक्तत्वात्किितिः परस्मैपदिषु पठितोऽप्यात्मनेपदी बोध्यः। न च गुपादिष्विति बहुवचनं वक्ष्यमाणमान्बधाद्यपेक्षमिति वाच्यम्, भाष्ये विशिष्य कितेरप्युपक्रमादित्याह एतदनुसारी वर्तमानोऽपि 'स्वाश्रयं कश्चिकित्सतु' इति खण्डनस्य व्याख्यावसरे 'चिकित्सतामिति तु युक्तम्' इत्याह।[१]

## 4. शाब्दिकाभरणकर्तुः हरियोगिनः कालः

लीलांशुकमुनिविरचितदैवव्याख्याने पुरुषकारेऽस्य नामोल्लेखः उपलभ्यते। अत एव हरियोगी पुरुषकार-लीलाशुकमुनेः प्राग्वर्ती विक्रमस्य १२ शतके आसीदिति प्रतीयते।

श्रीहरियोगिनो वंशादिवृत्तं न ज्ञायते। मद्रासराजकीयपुस्तकालयस्य भ्वादिप्रकरणस्यान्ते लिखितम्-

"इति हरियोगिनः प्रोल्लनाचार्यस्य कृतौ शाब्दिकाभरणे शब्विकरण भूवादवो धातवः समाप्ताः।।"

अनेन ज्ञायते यत् हरियोगिनः पितुः नाम प्रोल्लनाचार्यः आसीत्।

परन्तु तस्यैव हस्तलेखस्यान्ते-

"इति हरियोगिनः शैलवाचार्यस्य कृतौ शाब्दिकाभरणे धातुप्रत्ययपञ्जिकायां सौत्रधातवः समाप्ताः।।"

इति पाठः उपलभ्यते। तत्रास्य पितुर्नाम शैलवाचार्य इति लिखितम्।

सरस्वतीभवनपुस्तकालयस्य हस्तलेखे प्रतिप्रकरणम् अन्ते-

"इति हरियोगिनः प्रोल्लनाचार्यस्य कृतौ शाब्दिकाभरणे -----------धातवः समाप्ताः।।"

इत्युल्लेखः प्राप्यते।

पितुः नाम्नः उल्लेखः स्वनाम्नः परं अनेकत्र क्रियते अतः हरियोगिनः पितुः नाम प्रोल्लनाचार्यः इति सरस्वतीभवनहस्तलेखस्य आधारेण वक्तुं शक्यते।

मद्रासहस्तलेखे शाब्दिकाभरणस्य नाम्ना सह धातुप्रत्ययपञ्जिकायाः नामान्तरमप्युपलभ्यते। एषा धातुप्रत्ययपञ्जिका शाब्दिकाभरणस्यैवान्तर्गता इति यस्यां केवलं धातुप्रकरणस्यैव व्याख्या विहिता।

## 5. शाब्दिकाभरणस्य विषयपरिचयः

शाब्दिकाभरणस्य आरम्भः "अथ शब्दानुशासनम्" इति वार्तिकेन भवति। ग्रन्थस्यायं प्रथमो भागः। अत्र महाभाष्यपस्पशाह्निकस्य सारः प्रतिपादितः। भागेऽस्मिन् एते विषयाः विमृष्टाः दृश्यन्ते -

१ शब्दकौस्तुभे पृ० ३०८

अथ शब्दानुशासनम्, शब्दाः नित्याः अनित्याः वा, शब्दस्याभिव्यञ्जकत्वम्, शब्दस्य परिणामो विवर्तो वा, वाण्याः स्वरूपम्, शब्दब्रह्म, सिद्धे शब्दार्थ-संबन्धे शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे, व्याकरणाध्ययनस्य प्रयोजनम् इति।

एते विषयाः शाब्दिकाभरणे पाणिनिशिक्षा-महाभाष्य-वाक्यपदीयग्रन्थान् समाश्रित्य उपवर्णिताः सन्ति।

अनन्तरं भूत-वर्तमान-भविष्यकालस्य निरूपणात् परं दशानां लकाराणाम् अर्थाः निरूपिताः सन्ति। तदनु भ्वादि-अदादि-जुहोत्यादि-दिवादि-स्वादि-तुदादि-रुधादि-तनादि-क्र्यादि-चुरादि-कण्ड्वादि-प्रकरणानां व्याख्या कृता। ग्रन्थस्यान्ते सौत्राः धातवः पठिताः।

अत्र प्रतिगणं धातुसंख्या एवं लभ्यते -

| | |
|---|---|
| भ्वादिप्रकरणे | ७०३ |
| अदादिप्रकरणे | ०७२ |
| जुहोत्यादिप्रकरणे | ०१८ |
| दिवादिप्रकरणे | १२६ |
| स्वादिप्रकरणे | ०२५ |
| तुदादिप्रकरणे | १३३ |
| रुधादिप्रकरणे | ०२६ |
| तनादिप्रकरणे | ००९ |
| क्र्यादिप्रकरणे | ०५७ |
| चुरादिप्रकरणे | ००१ |

ग्रन्थेऽस्मिन् ११७० धातवः व्याख्याताः। चुरादौ चुर-धातोः व्याख्यानं कृत्वा आचार्यैः "एवमुत्तरत्रापि आगणपरिप्राप्ते वेदितव्यम्" इति विलिख्य सूचितं यत् अग्रे चुरादिगणे अन्ये धातवः अनेनैव प्रकारेण निरूपणीयाः।

शाब्दिकाभरणे धातोः व्याख्यानावसरे धात्वर्थनिदर्शनं कृत्वा लट् लङ् लोट लिङ् आशिषि लिट् लुङ् लृट् लृङ् लुट् एतेषु लकारेषु रूपाणि साधितानि। भू धातोः एध धातोश्च कर्तरि भावे सनन्ते यङन्ते रूपसिद्धिः दर्शिताः। अन्यत्र लट् लोट् लिङ् लकारे रूपाणि प्रदाय अग्रिमः धातुः व्याख्यातः।

## सन्दर्भग्रन्थाः-

१. ***क्षीरतरङ्गिणी*** - सम्पादक युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट बहालगढ़, हरियाणा, संवत २०४२

२. ***माधवीया धातुवृत्तिः*** - सम्पादक विजयपालो विद्यावारिधिः, रामलाल कपूर ट्रस्ट, सन् २००१

३. ***माधवीया धातुवृत्तिः*** - सम्पादक पं. अनन्त शास्त्री, चौखम्भा संस्कृत सीरिज आफिस, बनारस, सन् १९३४

४. ***धातुप्रदीप* -** श्रीशचन्द्र चक्रवर्ती भट्टाचार्य, रामलाल कपूर ट्रस्ट, सन् १९८६
५. ***दैवम्* -** सम्पादक युधिष्ठर मीमांसक, भारतीय प्राच्यविद्या प्रतिष्ठान, संवत् २०१९